श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# શ્રી મદ્ભાગવત રસિક કુટુંબ

## UG-11.13 - દ્વિતીય સોપાન



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

**નારાયણં(ન્) નમસ્કૃત્ય, નરં(ઞ્) ચૈવ નરોત્તમમ્.**
**દેવીં(મ્) સરસ્વતીં(મ્) વ્યાસં(ન્), તતો જયમુદીરયેત્.**

**નામસઙ્કીર્તનં(મ્) યસ્ય, સર્વપાપપ્રણાશનમ્.**
**પ્રણામો દુઃખશમનસ્, તં(ન્) નમામિ હરિં(મ્) પરમ્.**

**શ્રીમદ્ભાગવતમહાપુરાણમ્**

**એકાદશઃ સ્કન્ધઃ**

**અથ ત્રયોદશોऽધ્યાયઃ - ૧૩ ..**

## શ્રીભગવાનુવાચ

**સત્ત્વં(મ્) રજસ્તમ ઇતિ, ગુણા બુદ્ધેર્ન ચાત્મનઃ.**

**સત્ત્વેનાન્યતમૌ હન્યાત્, સત્ત્વં(મ્) સત્ત્વેન ચૈવ હિ .. ૧..**

સત્ત્વે + નાન્ + યતમૌ

**સત્ત્વાદ્ ધર્મો ભવેદ્ વૃદ્ધાત્, પું(વ્)સો મદ્ભક્તિલક્ષણઃ .**

**સાત્ત્વિકોપાસયા સત્ત્વં(ન્), તતો ધર્મઃ(ફ્) પ્રવર્તતે .. ૨..**

સાત્ત્વિકો + પાસયા

**ધર્મો રજસ્તમો હન્યાત્, સત્ત્વવૃદ્ધિરનુત્તમઃ .**

**આશુ નશ્યતિ તન્મૂલો, હ્યધર્મ ઉભયે હતે .. ૩..**

સત્ત્વ + વૃદ્ધિ + રનુત્તમઃ

**આગમોઽપઃ(ફ્) પ્રજા દેશઃ(ખ્), કાલઃ(ખ્) કર્મ ચ જન્મ ચ .**

**ધ્યાનં(મ્) મન્ત્રોઽથ સં(વ્)સ્કારો, દશૈતે ગુણહેતવઃ .. ૪..**

**તત્તત્સાત્ત્વિકમેવૈષાં(મ્), યદ્ યદ્ વૃદ્ધાઃ(ફ્) પ્રચક્ષતે .**

**નિન્દન્તિ તામસં(ન્) તત્તદ્, રાજસં(ન્) તદુપેક્ષિતમ્ .. ૫..**

તત્તત્ + સાત્ત્વિક + મેવૈષાં(મ્)

**સાત્ત્વિકાન્યેવ સેવેત, પુમાન્ સત્ત્વવિવૃદ્ધયે .**

**તતો ધર્મસ્તતો જ્ઞાનં(મ્), યાવત્ સ્મૃતિરપોહનમ્ .. ૬..**

સાત્ત્વિકાન્ + યેવ, સ્મૃતિ + રપોહનમ્

**વેણુસઙ્ઘર્ષજો વહ્નિર્ -દગ્ધ્વા શામ્યતિ તદ્વનમ્ .**

**એવં(ઙ્) ગુણવ્યત્યયજો, દેહઃ(શ્) શામ્યતિ તત્ક્રિયઃ .. ૭..**

વેણુ + સઙ્ઘર્ષજો , ગુણ + વ્યત્ + યયજો

**ઉદ્ધવ ઉવાચ**

**વિદન્તિ મર્ત્યાઃ(ફ્) પ્રાયેણ, વિષયાન્ પદમાપદામ્ .**

**તથાપિ ભુઞ્જતે કૃષ્ણ, તત્ કથં(મ્) શ્વખરાજવત્ .. ૮..**

પદમા + પદામ્ , શ્વખરા + જવત્

**શ્રીભગવાનુવાચ**

**અહમિત્યન્યથાબુદ્ધિઃ(ફ્), પ્રમત્તસ્ય યથા હૃદિ .**

**ઉત્સર્પતિ રજો ઘોરં(ન્), તતો વૈકારિકં(મ્) મનઃ .. ૯..**

અહ + મિત્યન્ + યથાબુદ્ધિઃ(ફ્) , ઉત્સર્ + પતિ

**રજોયુક્તસ્ય મનસઃ(સ્), સં(ઙ્)કલ્પઃ(સ્) સવિકલ્પકઃ .**

**તતઃ(ખ્) કામો ગુણધ્યાનાદ્, દુસહઃ(સ્) સ્યાદ્ધિ દુર્મતેઃ .. ૧૦..**

ગુણ + ધ્યાનાદ્

**કરોતિ કામવશગઃ(ખ્), કર્માણ્યવિજિતેન્દ્રિયઃ .**

**દુઃખોદર્કાણિ સમ્પશ્યન્, રજોવેગવિમોહિતઃ .. ૧૧..**

કા + મવશગઃ(ખ્), કર્માણ્ય + વિજિતેન્દ્રિયઃ

દુઃખો + દર્કાણિ , રજોવેગ + વિમોહિતઃ

**રજસ્તમોભ્યાં(મ્) યદપિ, વિદ્વાન્ વિક્ષિપ્તધીઃ(ફ્) પુનઃ .**

**અતન્દ્રિતો મનો યું(ગ્)જન્, દોષદૃષ્ટિર્ન સજ્જતે .. ૧૨..**

દોષ + દૃષ્ટિર્ + ન

**અપ્રમત્તોઽનુયું(ગ્)જીત, મનો મય્યર્પયઞ્છનૈઃ .**

**અનિર્વિણ્ણો યથાકાલં(ગ્), જિતશ્વાસો જિતાસનઃ .. ૧૩..**

અપ્રમત્તોઽ + નુયું(ગ્)જીત,મય્યર્ + પયઞ્ + છનૈઃ

**એતાવાન્ યોગ આદિષ્ટો, મચ્છિષ્યૈઃ(સ્) સનકાદિભિઃ .**

**સર્વતો મન આકૃષ્ય, મય્યદ્ધાવેશ્યતે યથા .. ૧૪..**

મચ્ + છિષ્યૈઃ(સ્), મય્યદ્ધાઽઽ + વેશ્યતે

ઉદ્ધવ ઉવાચ

યદા ત્વં(મ્) સનકાદિભ્યો, યેન રૂપેણ કેશવ .

યોગમાદિષ્ટવાનેતદ્, રૂપમિચ્છામિ વેદિતુમ્ .. ૧૫..

યોગમા + દિષ્ટવા + નેતદ્

શ્રીભગવાનુવાચ

પુત્રા હિરણ્યગર્ભસ્ય, માનસાઃ(સ્) સનકાદયઃ .

પપ્રચ્છુઃ(ફ્) પિતરં(મ્) સૂક્ષ્માં(મ્), યોગસ્યૈકાન્તિકીં(ઙ્) ગતિમ્ .. ૧૬..

યોગસ્યૈ + કાન્તિકીં(ઙ્)

સનકાદય ઊચુઃ

ગુણેષ્વાવિશતે ચેતો, ગુણાશ્ચેતસિ ચ પ્રભો .

કથમન્યોન્યસં(ન્)ત્યાગો, મુમુક્ષોરતિતિતીર્ષોઃ .. ૧૭..

ગુણેષ્ + વાવિશતે, કથમન્ + યોન્ય + સં(ન્)ત્યાગો

મુમુક્ષો + રતિતિતીર્ + ષોઃ

શ્રીભગવાનુવાચ

એવં(મ્) પૃષ્ટો મહાદેવઃ(સ્), સ્વયં(મ્)ભૂર્ભૂતભાવનઃ .

ધ્યાયમાનઃ(ફ્) પ્રશ્નબીજં(ન્), નાભ્યપદ્યત કર્મધીઃ .. ૧૮..

સ્વયં(મ્) + ભૂર્ભૂત + ભાવનઃ ,નાભ્ય + પદ્યત

સ મામચિન્તયદ્ દેવઃ(ફ્), પ્રશ્નપારતિતીર્ષયા .

તસ્યાહં(મ્) હં(વ્)સરૂપેણ, સકાશમગમં(ન્) તદા .. ૧૯..

મા + મચિન્તયદ્, પ્રશ્નપા + રતિતીર્ + ષયા ,સકા + શમગમં(ન્)

**દૃષ્ટ્વા માં(ન્) ત ઉપવ્રજ્ય, કૃત્વા પાદાભિવન્દનમ્ .**

**બ્રહ્માણમગ્રતઃ(ખ્) કૃત્વા, પપ્રચ્છુઃ(ખ્) કો ભવાનિતિ .. ૨૦..**

પાદા + ભિવન્દનમ્ ,બ્રહ્માણ + મગ્રતઃ(ખ્)

**ઇત્યહં(મ્) મુનિભિઃ(ફ્) પૃષ્ટસ્ - તત્ત્વજિજ્ઞાસુભિસ્તદા .**

**યદવોચમહં(ન્) તેભ્યસ્ - તદુદ્ધવ નિબોધ મે .. ૨૧..**

તત્ત્વ + જિજ્ઞાસુ + ભિસ્તદા,

યદવો + ચમહં(ન્), તદુદ્ + ધવ

**વસ્તુનો યદ્યનાનાત્વ - માત્મનઃ(ફ્) પ્રશ્ન ઈદૃશઃ .**

**કથં(ઙ્) ઘટેત વો વિપ્રા, વક્તુર્વા મે ક આશ્રયઃ .. ૨૨..**

યદ્ય + નાનાત્વ

**પં(ઞ્)ચાત્મકેષુ ભૂતેષુ, સમાનેષુ ચ વસ્તુતઃ .**

**કો ભવાનિતિ વઃ(ફ્) પ્રશ્નો, વાચારમ્ભો હ્યનર્થકઃ .. ૨૩..**

પં(ઞ્)ચાત્ + મકેષુ

**મનસા વચસા દૃષ્ટ્યા, ગૃહ્યતેઽન્યૈરપીન્દ્રિયૈઃ .**

**અહમેવ ન મત્તોઽન્ય-દિતિ બુધ્યધ્વમં(ઞ્)જસા .. ૨૪..**

ગૃહ્યતેઽન્ + યૈરપીન્ + દ્રિયૈઃ,

બુધ્ + યધ્વ + મં(ઞ્)જસા

**ગુણેષ્વાવિશતે ચેતો, ગુણાશ્ચેતસિ ચ પ્રજાઃ .**

**જીવસ્ય દેહ ઉભયં(ઙ્), ગુણાશ્ચેતો મદાત્મનઃ .. ૨૫..**

ગુણેષ્વા + વિશતે, ગુણાશ્ + ચેતસિ

ગુણેષુ ચાવિશચ્ચિત્ત - મભીક્ષ્ણં(ઙ્) ગુણસેવયા .

ગુણાશ્ચ ચિત્તપ્રભવા, મદ્રૂપ ઉભયં(ન્) ત્યજેત્ .. ૨૬..

ચાવિશચ્ + ચિત્ત

જાગ્રત્ સ્વપ્નઃ(સ્) સુષુપ્તં(ઞ્) ચ, ગુણતો બુદ્ધિવૃત્તયઃ .

તાસાં(મ્) વિલક્ષણો જીવઃ(સ્), સાક્ષિત્વેન વિનિશ્ચિતઃ .. ૨૭..

યર્હિ સં(વ્)સૃતિબન્ધોઽય - માત્મનો ગુણવૃત્તિદઃ .

મયિ તુર્યે સ્થિતો જહ્યાત્, ત્યાગસ્તદ્ ગુણચેતસામ્ .. ૨૮..

સં(વ્)સૃતિ + બન્ધોઽય

અહં(ઙ્)કારકૃતં(મ્) બન્ધ - માત્મનોઽર્થવિપર્યયમ્ .

વિદ્વાન્ નિર્વિદ્ય સં(વ્)સાર - ચિન્તાં(ન્) તુર્યે સ્થિતસ્ત્યજેત્ .. ૨૯..

માત્મનોઽર્થ + વિપર્યયમ્ , સ્થિતસ્ + ત્યજેત્

યાવન્નાનાર્થધીઃ(ફ્) પું(વ્)સો, ન નિવર્તેત યુક્તિભિઃ .

જાગર્ત્યપિ સ્વપન્નજ્ઞઃ(સ્) સ્વપ્ને જાગરણં(મ્) યથા .. ૩૦..

યાવન્ + નાનાર્ + થધીઃ(ફ્),

જાગર્ + ત્યપિ ,સ્વપન્ + નજ્ઞઃ(સ્)

અસત્ત્વાદાત્મનોઽન્યેષાં(મ્), ભાવાનાં(ન્) તત્કૃતા ભિદા .

ગતયો હેતવશ્ચાસ્ય, મૃષા સ્વપ્નદૃશો યથા .. ૩૧..

અસત્ત્વા + દાત્મનોઽન્ + યેષાં(મ્),

હેતવશ્ + ચાસ્ય

**યો જાગરે બહિરનુક્ષણધર્મિણોડર્થાન્,**

**ભુઙ્ક્તે સમસ્તકરણૈર્હૃદિ તત્સદૃક્ષાન્ .**

**સ્વપ્ને સુષુપ્ત ઉપસં(વ્)હરતે સ એકઃ(સ્)**

**સ્મૃત્યન્વયાત્રિગુણવૃત્તિદૃગિન્દ્રિયેશસ્મૃત્યન્વયાત્રિગુણવૃત્તિદૃગિન્દ્રિયેશઃ .. ૩૨..**

બહિ + રનુ + ક્ષણ + ધર્મિણોડર્થાન્ ,

સમસ્ત + કરણૈર્ + હૃદિ

સ્મૃત્યન્ + વયાત્રિ + ગુણવૃત્તિ + દૃગિન્દ્રિ + યેશઃ

**એવં(મ્) વિમૃશ્ય ગુણતો મનસસ્ત્ર્યવસ્થા,**

**મન્માયયા મયિ કૃતા ઇતિ નિશ્ચિતાર્થાઃ .**

**સં(ગ્)છિદ્ય હાર્દમનુમાનસદુક્તિતીક્ષ્ણ-**

**જ્ઞાનાસિના ભજત માખિલસં(વ્)શયાધિમ્ .. ૩૩..**

મનસસ્ + ત્ર્યવસ્થા , હાર્ + દમનુમા + નસદુક્તિ + તીક્ષ્ણ ,

માખિલ + સં(વ્)શયાધિમ્

**ઈક્ષેત વિભ્રમમિદં(મ્) મનસો વિલાસં(ન્)**

**દૃષ્ટં(મ્) વિનષ્ટમતિલોલમલાતચક્રમ્ .**

**વિજ્ઞાનમેકમુરુધેવ વિભાતિ માયા,**

**સ્વપ્નસ્ત્રિધા ગુણવિસર્ગકૃતોષ વિકલ્પઃ.. ૩૪..**

વિનષ્ટ + મતિલો + લમલાત + ચક્રમ્ ,

વિજ્ઞા + નમેક + મુરુધેવ ,સ્વપ્નસ્ + ત્રિધા

દૃષ્ટિ(ન્) તતઃ(ફ્) પ્રતિનિવર્ત્ય નિવૃત્તતૃષ્ણ-

સ્તૂષ્ણીં(મ્) ભવેન્નિજસુખાનુભવો નિરીહઃ .

સંન્દૃશ્યતે ક્વ ચ યદીદમવસ્તુબુદ્ધ્યા,

ત્યક્તં(મ્) ભ્રમાય ન ભવેત્ સ્મૃતિરાનિપાતાત્ .. ૩૫..

પ્રતિ + નિવર્ + ત્યં(ન્) ભવેન્ + નિજસુખા + નુભવો

યદી + દમવસ્તુ + બુદ્ધ્યા , સ્મૃતિરા + નિપાતાત્

દેહં(ઞ્) ચ નશ્વરમવસ્થિતમુત્થિતં(મ્) વા,

સિદ્ધો ન પશ્યતિ યતોઽધ્યગમત્ સ્વરૂપમ્ .

દૈવાદપેતમુત દૈવવશાદુપેતં(મ્),

વાસો યથા પરિકૃતં(મ્) મદિરામદાન્ધઃ .. ૩૬..

નશ્વર + મવસ્થિત + મુત્થિતં(મ્), યતોઽ + ધ્યગમત્ + સ્વરૂપમ્

દૈવાદપે + તમુત ,દૈવ + વશા + દુપેતં(મ્) ,મદિરા + મદાન્ધઃ

દેહોઽપિ દૈવવશગઃ(ખ્) ખલુ કર્મ યાવત્,

સ્વારમ્ભકં(મ્) પ્રતિસમીક્ષત એવ સાસુઃ .

તં(મ્) સ પ્રપઞ્ચમધિરૂઢસમાધિયોગઃ(સ્),

સ્વાપ્નં(મ્) પુનર્ન ભજતે પ્રતિબુદ્ધવસ્તુઃ .. ૩૭..

દૈવ + વશગઃ(ખ્), પ્રપઞ્ચ + મધિરૂઢ + સમાધિયોગઃ(સ્) ,પ્રતિ + બુદ્ધ + વસ્તુઃ

મયૈતદુક્તં(મ્) વો વિપ્રા, ગુહ્યં(મ્) યત્ સાં(ઙ્)ખ્યયોગયોઃ .

જાનીત માઽઽગતં(મ્) યજ્ઞં(મ્), યુષ્મદ્ધર્મવિવક્ષયા .. ૩૮..

મયૈ + તદુક્તં(મ્), સાં(ઙ્)ખ્ય + યોગયોઃ, યુષ્મદ્ + ધર્મ + વિવક્ષયા

અહં(મ્) યોગસ્ય સાં(ઙ્)ખ્યસ્ય, સત્યસ્યર્તસ્ય તેજસઃ .

પરાયણં(ન્) દ્વિજશ્રેષ્ઠાઃ(શ્) શ્રિયઃ(ખ્) કીર્તેર્દમસ્ય ચ .. ૩૯..

સત્યસ્ + યર્ + તસ્ય, કીર્તેર્ + દમસ્ય

માં(મ્) ભજન્તિ ગુણાઃ(સ્) સર્વે, નિર્ગુણં(ન્) નિરપેક્ષકમ્ .

સુહૃદં(મ્) પ્રિયમાત્માનં(મ્), સામ્યાસં(ઙ્)ગાદયોગુણાઃ .. ૪૦..

સામ્યા + સં(ઙ્)ગા + દયો + ગુણાઃ

ઇતિ મે છિન્નસન્દેહા, મુનયઃ(સ્) સનકાદયઃ .

સભાજયિત્વા પરયા, ભક્ત્યાગૃણત સં(વ્)સ્તવૈઃ .. ૪૧..

તૈરહં(મ્) પૂજિતઃ(સ્) સમ્યક્, સં(વ્)સ્તુતઃ(ફ્) પરમર્ષિભિઃ .

પ્રત્યેયાય સ્વકં(ન્) ધામ, પશ્યતઃ(ફ્) પરમેષ્ઠિનઃ .. ૪૨..

પરમર્ + ષિભિઃ

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં

સંહિતાયાં એકાદશસ્કન્ધે ત્રયોદશોઽધ્યાયઃ .. ૧૩..

ૐ પૂર્ણમદઃ(ફ્) પૂર્ણમિદં(મ્) પૂર્ણાત્પૂર્ણમુદચ્યતે
પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે.
ૐ શાન્તિઃ(શ્) શાન્તિઃ(શ્) શાન્તિઃ

